Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनायनमः ॥

# ॥ श्रीइलातीपुत्रचरित्रम् ॥

(कर्त्ता श्रीशुभशीलगणी) गद्यबद्धं.

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

सने १९३४ सवंत् १९९१

किंमत रु. ०-८-०

श्रीजैन भास्करोदय प्रिन्टिंग प्रेसमां छाप्युं—जामनगर.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्रीजिनाय नमः ।
॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीइलातीपुत्रचरित्रंप्रारभ्यते ॥

( द्वितीयावृत्तिः ) ( कर्ता–श्रीशुभशीलगणी )

छपावी प्रसिद्ध करनार–पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

अनित्यत्वादिकां शुद्धां । भावनां स्मरता हृदि ॥ इलातीतनयस्येव । पुंसा मुक्तिरवाप्यते ॥ १ ॥
इहैव जंबूद्वीपे भारते क्षेत्रे इलाभूषणा इलावर्धनाख्या पुरी बभूव. तत्र नराधिपशतसेव्यो न्यायाध्वना राज्यं पालयन् जितशत्रुनामा राजाभूत्. तत्रैको व्यापारिशिरोमणिरिभ्यनामा श्रेष्ठी वसतिस्म. तस्य च शीलादिगुणगणधारिणी धारिण्यभिधा भार्यासीत्, संसारसुखानि भुंजानयोरपि तयोः किंचिदपत्यं नाभूत्, तेन च तौ दंपती निजमनसोर्दुःखं मन्यमानावास्तां; अथान्येद्युस्ताभ्यां श्रीजिनाधिष्ठायिकाया इलादे-

For Private and Personal Use Only

व्याः पुत्रप्राप्त्यर्थमाराधनं कृतं, प्रोक्तं च यद्यावयोः पुत्रो भविष्यति तदा भवत्यानामांकितं तस्य पुत्रस्याभिधानं करिष्यावः अथैवं धर्मध्यानपरयोस्तयोः क्रमात् पुत्रो जातः, तदा तस्य महताडंबरेण जन्मोत्सवं विधाय प्रतिपन्नवचनानुसारेण ताभ्यां तस्य सुतस्य "इलातिपुत्र" इति नाम विहितं. अथैवं धात्रीभिर्लाल्यमानोऽसौ क्रमेण वृद्धिं प्राप्नुवन्नष्ट. वार्षिको जातः ततोऽसौ पितृभ्यां कलाभ्यासार्थं पाठशालायामाचार्यसन्निधौ मुक्तः, तत्रासौ प्रयासंविनैव सकलकलाभ्यासपूर्वकं विषमाण्यपि शास्त्राणि सूत्रार्थैः सहाभ्यस्तवान्. अथ स यौवनं प्राप्तोऽपि सकलविषयेभ्यः पराङ्मुखीभूय विशेषतस्तरुणीभ्यो मनागपि निजमनो न दत्तेस्म. किंतु साधुजनानां संगं कुर्वन् सदा निजमनसि वैराग्यमेव भावयामास, यथा—संतोषस्त्रिषु कर्तव्यः। स्वदारे भोजने धने ॥ त्रिषु चैव न कर्तव्यो। दाने चाध्ययने जपे ॥ १॥ पंडितेषु गुणाः सर्वे। मूर्खे दोषास्तु केवलं ॥ तस्मान्मूर्खसहस्रेषु। प्राज्ञ एको न लभ्यते ॥२॥ धैर्यं यस्य पिता क्षमा च जननी शांतिश्चिरं गेहिनी। सत्यं सूनुरयं दया च भगिनी भ्राता मनः संयमः ॥ शय्याभूमितलंदिशोऽपि वसनं ज्ञानामृतं भोजन—मेते यस्य कुटुंबिनो वदसखे कस्माद् भयं योगिनः ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादि वैराग्यमेव भावयन् स्त्रीसंगं केवलं नरकप्रदमेव स मन्यतेस्म. अथैवं वैराग्यपरं निजपुत्रं त्रिवर्गशून्यमेव मन्यमानस्तस्य जडबुद्धिः पिता तं विषयकुशलं विधातुमिच्छतिस्म. अथासौ नगरमध्यात्कांश्चन दुर्ललितान् सप्तव्यसनोपेतान् वेश्यागमनप्रवीणान् यूनो निजपार्श्वे समाहूय कथयामास, भो पुरुषाः ! यूयमेनमिलातीपुत्रं. मम तनयं युष्मत्सार्थे गृहीत्वा स्त्रीविषयादिषु प्रवीणं कुरुध्वं ? तत्र च यद्द्रव्यादि युज्यते, तत्सर्वं ममाग्रतो ग्राह्यं. एवं तदुक्तानि वचनानि श्रुत्वा प्राप्तदुग्धा बिडाला इव प्रहृष्टमानसास्ते दुर्ललिताः कथयामासुः. भो श्रेष्ठिन् ! एतत्त्वस्माकं कार्यमेव, स्तोकेनैव कालेन वयमिममिलातीपुत्रं सर्वविषयेषु कुशलं करिष्यामः, अथ श्रेष्ठ्यपि तं निजपुत्रमिलातीपुत्रं समाहूय कथयामास, भो पुत्र ! अद्यप्रभृति एते सज्जनास्तव मैत्रीं कर्तुं वांछंति, अतस्त्वमप्येभिः सह गत्वा सकलव्यवहारकुशलो भव ? एते सर्वप्रकारैस्तव मानसमानंदयिष्यंति. एवं निजतातादिष्टः स इलातीपुत्रोऽपि तैःसह चलितः अथ ते दुर्ललिता वसंतोत्सवे जातिकेतकीचंपकाशोकचूतादीनां प्रफुल्लकुसुमादिभिः सुरभीभूते उद्याने तमिलातीपुत्रं निन्युः. इतस्तत्र लंखिकाख्यनटस्यैका कन्यका तत्र नृत्यंती तेन राजपुत्रेण दृष्टा. सा च



For Private and Personal Use Only

यौवनवती रंभेव रूपलावण्यादिसंपन्नाभूत्. तां च दृष्ट्वा दैवयोगात्पूर्वभवस्नेहेन स भृशं कामातुरो बभूव. तां च परिणेतुकामः स तत्र तां पुनः पुनर्विलोकयन् निश्चेष्टः कीलित इवाजनि. अथेंगिताकारज्ञानकुशलास्ते दुर्ललितास्तं तथाविधं कामदशाविह्वलं विज्ञाय निजप्रयासं च सफलं मन्यमानाः, श्रेष्ठितश्च भूरिद्रव्यपारितोषिकलाभंध्यायंतस्तत्र स्तंभितं तमिलातीपुत्रं कथयामासुः, भो मित्र! अथेतो निजगृहे गम्यते, यतस्तत्र पिता त्वांविनाऽधृतिं करिष्यति, इति पुनः पुनस्तैरुक्तः स विमनस्कः कथंचितैस्तद्गृहे नीतः. तत्र शयने सुप्तोऽप्यसौ क्षणमपि समाधिं न लभतेस्म. अथ तथावस्थमसमाधिगतं निजतनयं वीक्ष्य श्रेष्ठी तं पप्रच्छ, भो वत्स! अद्य त्वमेवं दुर्मनायितः कथं दृश्यते? किं केनापि तवापराधः कृतोऽस्ति? किंवा केनापि किंचित्तवापमानं कृतमस्ति? एवं श्रेष्ठिना मुहुर्मुहुः पृष्टोऽपि मुनिरिव मौनमाश्रितोऽसौ किंचिदपि न जल्पति, केवलमुष्णनिःश्वासानेव मुंचतिस्म. ततः श्रेष्ठी तान् दुर्ललितान् तद्वयस्यान् समाहूय निजपुत्रस्य दुर्मनःकारणं पप्रच्छ. तदा ते प्राचुः, हे श्रेष्ठिन्! अद्योद्याने स्माभिःसहागतेनानेन कुमारेण लंखिकाख्यनटस्य मनोहरा कन्या नृत्यंती दृष्टास्ति. ततः प्रभृति मदनबाणैर्हतोऽयं तां परिणे-

तुकामो जातोऽस्ति. इत्युक्त्वा लब्धपारितोषिकास्ते तु ततश्चलिता निजस्थाने ययुः. ततः श्रेष्ठी पश्चात्तापं कुर्वन् निजपुत्रंप्रति जगाद, भो पुत्र! त्वं कुलीनः वणिक् पुत्रोऽसि, इमां चाकुलीनां नटकन्यां परिणेतु कथमीहसे? अहं ते रूपलावण्यादिगुणगणोपेता भूरिशो वणिक् कन्याः परिणाययिष्ये. एवंविधानि पितुर्वचनानि श्रुत्वा स इलातीपुत्रोऽभाषत, हे तात! अहमेतत् सर्वमपि जानामि, यन्नटकन्यापरिणयनं मे वणिक्श्रेष्ठि पुत्रस्य केवलमयोग्यमेवास्ति, परं किं करोमि? मदीयं मनस्तस्यामेव नटकन्यायामासक्तीभूतं वर्तते. यतः—यत्र यस्य मनः सक्तं। शर्म तत्र स मान्यते ॥ मृद्विकां करभस्त्यक्त्वा। स्नुहीमेवात्ति भावतः ॥ १ ॥ एवंविधं निजपुत्रवचोनिशम्य पश्चात्तापपरः स श्रेष्ठी दध्यौ, अरेरे! मया स्वयमेवाविचारितं कार्यं कृतं, यदस्य तेषां दुर्ललितानां कुसंगतिः कारिता, तस्याश्च स कुसंगत्या एवंविधं कटुफलं प्रादुर्भूतं. अथायं केनाप्युपायेने तो दुराग्रहान्निवारयितुमशक्योऽस्ति. निषिधश्च स तदासक्तचित्तः चेदात्महत्यां करिष्यति, तदा मे का गतिर्भाविनी? इतो व्याघ्र इतस्तटी इति न्यायो मम समापतितोऽस्ति. इत्यादि ध्यात्वा विषण्णीभूतः स श्रेष्ठी तं लंखिकं नटपेटकस्वामिनमाकार्य कथयामास. भो

लंखिक ! त्वं मदीयपुत्राय त्वदीयां कन्यां देहि ? तत् श्रुत्वा स लंखिकः स्पष्टमभाषिष्ट, भो श्रेष्ठिन् ! चेत्त्वदीयपुत्रस्य मदीयामिमां पुत्रीं परिणेतुमिच्छा वर्तते, तदाऽस्मदीयपेटके समायातु, अस्माभिः सह भोजनादि कुर्वन्, नटकलाभ्यासं च कुर्वन्, स सुखेन निजकालं गमयतु. अहमपि च तं नटकलाकुशलतया धनमर्जयं तं विज्ञाय सुखेनैवैनां मदीयां कन्यां तस्मै दास्यामि. अथ तत् श्रुत्वा खिन्नोऽपि स श्रेष्ठी निजतनयात्मघातभीतः सन् नटोक्तं सर्वमपि स्वीचकार. अथ तं नटं विसर्ज्य स श्रेष्ठी पुनरपि निजसुतपार्श्वे गत्वा तं प्रतिबोधयामास, परं तस्यां नटतनयायामासक्तेनेलातीपुत्रेण निजाग्रहो न परित्यक्तः, एवं जनकोपदेशमवमन्य स विषयाभिलाषया द्रुतं तत्र लंखिकनटपेटके गतः. तदा तेन नटेनापि तस्मै प्रोक्तं, भो इलातीपुत्र ! यदि त्वमस्मदीयां नृत्यकलां शिक्षयसि, तदा तुभ्यमेनां कन्यां दास्यामः. एवं लंखिकादिष्टोऽसौकामार्थीपरमानंदेन नृत्यकलाभ्यासं कर्तुं लग्नः, यतः कामाशुत्रैः स्वांत—कुंभे जर्जरिते सति ॥ स्तोकमप्युपदेशांभः । क्षिप्तं संतिष्ठते कथं ॥ १ ॥ अपसर सखे दूरादस्मात् कटाक्ष विषाननात् । प्रकृतिविषमा द्योषित्सर्पाद्विलासफणाभृतः ॥ इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधै—श्च-

टुलवनिताभोगैर्ग्रस्तं त्यजंति हि मंत्रिणः ॥ २ ॥ नपुंसकमिति ज्ञात्वा । स्त्रींप्रति प्रेषितं मनः ॥ तत्तुत्रैव रमते । हताः पाणिनिना वयं ॥ ३ ॥ प्राणानपि विमुंचंते । स्त्रीशस्त्रीदीर्णवक्षसः ॥ पुरुषा मदनासक्ता । मत्स्याव गललोलुपाः ॥ ४ ॥ अथ प्रज्ञाप्रकर्षत्वात् स इलातीपुत्रः स्तोकेनैव कालेन नृत्यकलासु कुशलो बभूव. अथ स लंखिकस्तं नृत्यकलाकुशलं विज्ञाय कथयामास. भो वत्स ! अथ त्वं तूर्गं स्वनृत्य कलादर्शनतो द्रुतं द्रव्यमर्जयस्व ? येन महोत्सवपूर्वकं तुभ्यमेषा मनोहरा कन्या दीयते. ततः स ईलातीपुत्रस्तन्नटकन्यापरिणयनोत्सुको द्रव्योपार्जनार्थं लंखिकादिपेटकयुतो बेन्नातटाख्ये पुरे समेत्य तत्रत्य महोपालं विज्ञपयामास, हे राजन् ! वयं तवास्मदीयनृत्यकलांदर्शयितुं वांछामः. तत् श्रुत्वा भूपेनोक्तं सुखेन युष्मदीयां नृत्यकलां मे दर्शयध्वं ? तद् दृष्ट्वा हृष्टोऽहं युष्मभ्यं भूरिदानं दास्ये. अथैवं नृपादिष्ट इलातीपुत्रो भूरिधनलाभलोलुपो नानाभिनयबंधुरं तथाविधं मनोहरं प्रेक्षणं चकार, यथा सर्वेऽपि लोका निजहृदयेषु चमत्कारं प्राप्ताः. तदानीं च तालानुसारेण पटहंवादयंतीं तां रूपतिरस्कृतदेवांगनां लंखिकपुत्रीं दृष्ट्वा मदनबाणविद्धो राजा हर्तुकामोऽभूत्. ततश्चेलातीपुत्रमरणं वांछन् स तं जगौ, भो इलाती-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पुत्र ! त्वं वंशोपरिविलजीनो नृत्यं कुरु? एवं नृपादिष्टः स वंशोपरिस्थितस्तथा नृत्यं चकार, यथा राजादयः सर्वेऽपि लोका निजहृदयेषु भृशमाश्चर्यं प्राप्ताः. पुनस्तेन क्रूरहृदयेन राज्ञा प्रोक्तं त्वमथाकाशे निराधारो भूत्वा नृत्यं कुरु? तत् श्रुत्वा तेनेलातिपुत्रेणापि तथैवं विहितं. अथैव नृत्यं कुर्वतोऽपि तस्येलातीपुत्रस्य मरणमजातं विलोक्य नृपो निजकुटिलाशयेन तस्य पार्श्वेवारत्रयमेवमेव निराधारं नृत्यं कारयामास. अथ चतुर्थवारके नृपादेशेन वंशोपरि चटित इलातीपुत्रस्तं नृपं निजप्रियायामासक्तमानसं निजमारणाभिलाषं च कुर्वंतं स्वबुध्ध्या विज्ञाय चिंतयामास, अहो! विषयवैषम्यं धिक्! अयं राजापि मदनबाणविद्धो नीचकुलोत्पन्नायामप्यस्यां नट्यामासक्तो जातोऽस्ति, ततश्च मां मारयितुं पुनः पुनर्नृत्यं कारयति. अरेरे! स्वर्गीयदेवांगनोपमे सत्यपि निजांतःपुरे कामविह्वलोऽयं नृप एतस्यामेवासक्तो जातः, धिगस्तु कामविकारं. यत—सस्वाधीनेऽपि कलत्रे । नीचः परदारलंपटे भवति ॥ संपूर्णेऽपि तटाके । काकः कुंभोदकं पिबति ॥ १ ॥ अरेरे! मया मातापित्रोर्वचनमुल्लंघ्यैनंविधमकार्यं कृतं, निर्मलेऽपि कुले केवलं विषयसुखवांछया कलंको दत्तः, अतो मां धिगस्तु. एवंविधा विषयासक्तिर्मयात्रैव दुःखपरिणामरूपाऽनु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूता. यतः—ते धत्तूरतरुं वपंति भुवने प्रोन्मूल्य कल्पद्रुमं । गृह्णंति खलुकर्करंनिजकरे प्रक्षिप्य चिंतामणिं ॥ विक्रीय द्विरदं गिरींद्रसदृशं क्रीणंति ते रासभं । ये लब्धं परिहृत्य धर्ममधमा धावंति भोगाशया ॥ १ ॥ एवं वैराग्यवासितहृदयो यावत् स इलातीपुत्रो वंशाग्रस्थितो ध्यायति, तावत्स कस्यचिन्महेभ्यस्य गृहे भिक्षार्थं प्रविष्टान् कांश्चिन्मुनीन् स ददर्श. तदैव निजरूपनिर्जितरंभा, दिव्यवस्त्रालंकारधारिणीं, चंद्रानना तस्य धनपतेर्वधूस्तेभ्यो मुनिभ्यो भिक्षादानार्थं हस्तधृतमनोहरमोदकस्थाला तदग्रे समागत्य स्थिता. परं ते मुनयस्तां ललनां निजदृष्ट्यापि न विलोकयामासुः.ततो गृहीतभिक्षास्ते साधवस्ततो मह्यामेव न्यस्तदृष्टयो निवृत्ताः. एवंविधान्निग्रहितेंद्रियांस्तान् मुनीन्द्र दृष्ट्वा स इलातीपुत्रो निजहृदि दध्यौ, धन्या एते मुनय एव वंदनीयाः. यतः—ते कह न वंदणिज्जा । रूवं दट्ठूण परकलत्ताणं ॥ धाराहयव्व वसहा । वच्चंति महीं पलोअंता ॥ १ ॥ अल सा होइ अकज्जे । पाणीवहे पंगुला सया होइ ॥ परतत्तीसु य बहिरा । जच्चंधापरकलत्तेसु ॥ २ ॥ अहं त्वस्यां नीचकुलोत्पन्नायामपि नटकन्यययां षिषयसेवनवांछया लुब्धो जातोऽस्मि, अतो मां धिगस्तु. एवमात्मनिंदातत्परस्य, शुभभावदृढचित्तस्य, शुभ-

For Private and Personal Use Only

ध्यानाधिरूढस्य च तस्यैलातीपुत्रस्य तत्रैव वंशोपरि स्थितस्य केवलज्ञानं समुत्पन्नं. तदैव शासनदेवता-दत्तमुनिलिंगोऽसौ कनककमलस्थितो भूपादीनामाश्चर्यं जनयन् धर्मोपदेशं दत्तवान्. यथा—भो भव्या इह संसारे । मानुष्यमतिदुर्लभं ॥ लब्धा पाथोनिधेर्मध्ये । चिंतारत्नमिवामलं ॥ १ ॥ दान शीलतपो-भाव–मये धर्मे चतुर्विधे ॥ यतनीयं भवद्भिश्च । स्वर्गमोक्षसुखार्थिभिः ॥ २ ॥ युग्मं ॥ इत्यादिधर्मोप-देशमाकर्ण्य राज्ञा तस्यैलातीपुत्रस्य केवलिनोमुनेः पृष्टं, भो मुनिराज! भवतोऽस्यां नटकन्यायां रागः कथमभवत्? तत् श्रुत्वा स केवली जगौ, पूर्वं वसंतपुराख्ये नगरे भूपपुरोहितो मदननामा द्विजोऽभूत्. तस्य द्विजस्य मोहिन्यभिधा वल्लभा प्राणेभ्योऽप्यतिप्रियतमा बभूव. अथान्येद्युस्तौ दंपती सुगुरोः पार्श्वे धर्मोपदेशं श्रुत्वा प्रतिबुधौ दीक्षां जग्रहतुः. एवं दीक्षितयोरपि तयोः परस्परं प्रीतिरतीवरागतंतुभिः स्यू-तेव सर्वथा नात्रुटत्. इतोऽन्यदा केनचित् पृष्टा सा मोहिनी साध्वी जातिमदेन मूढात्मतया निजमुखेन स्वकीयं द्विजजातिसंभवमुत्तमं कुलं प्रशंसयामास. एवंविधं जातिमदसंभवं निजदुष्कर्म गुरूणामग्रेऽना-लोच्यैव मृता स्वर्गे गता. स द्विजोऽपि निजायुःक्षयेण मृतो देवलोके गतः. ततः स देव आयुःक्षये त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तो देवलोकाच्च्युत इलावर्धने पुरेऽहं श्रेष्ठिपुत्रो जातः. स मोहिनीजीवोऽपि स्वर्गाच्च्युत्वा पूर्वभवे जातिमदकरणान्नटकुले पुत्रीत्वेन समुत्पन्ना. अथ पूर्वभवसंबंधेनास्मिन् भवेऽपि मम तस्यां भूरितरः स्नेहो जातः. तत् श्रुत्वा वैराग्यवासितहृदयास्ते नृपनटात्मजादयः सर्वेऽपि जैनधर्मं प्रतिपेदिरे. क्रमेण ते सर्वेऽपि दीक्षां गृहीत्वा तीव्रतपोऽग्निना कर्मेंधनानि प्रज्वाल्य संप्राप्तकेवलज्ञाना मुक्तिं ययुः.

॥ इति श्रीइलातीपुत्रचरित्रं समाप्तम् ॥ श्रीरस्तु ॥

आ चरित्रनी बीजी आवृत्ति श्रीशुभशीलगणीजीए रचेला कथाकोष नामना ग्रंथमांथी उद्धरीने तेनी मूलभाषामां बनता प्रयासे सुधारो वधारो करी जामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयने माटे पोताना श्रीजैनभास्करोदय प्रेसमां छापीने प्रसिद्ध कर्युं.

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति श्रीइलातीपुत्रचरित्रं समाप्तम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only